# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 7** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.E.2.4.4** समयः – 3:00 तः 6:00

दिनाङ्कः –05/04/2019 सन्दर्भग्रन्थः – श्रीमद्भागवते (6-7 स्कन्धौ)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः ससन्दर्भं प्रसङ्गं व्याख्या कार्या।** **10**

(1) वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ॥

(2) पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः।
एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ॥

(3) तानानयध्वमसतो विमुखान् मुकुन्दपादारविन्दमकरन्दरसादजस्रम्।
निष्किञ्चनैः परमहंसकुलै रसज्ञैर्जुष्टाद् गृहे निरयवर्त्मनि बद्धतृष्णान् ॥

**प्रश्नः-2 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) अजामिलोपाख्यानं वर्णयत।

(2) नारायणवर्मोपदेशं लिखत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः ससन्दर्भं प्रसङ्गं व्याख्या कार्या।** **10**

(1) आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः।
भान्त्येव हि तत्काले यथाऽनिच्छेर्विपर्ययाः ॥

(2) यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिमं द्वितीयं विसृज्य।
सद्यस्तदीयमतुलानधिकं महित्वं प्रायुर्भवानपि परं नचिरादुपैति ॥

(3) न तस्य कश्चिद्दयितः प्रतीयो न ज्ञातिबन्धुर्न परो न च स्वः।
समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुत एव शेषः ॥

**प्रश्नः-4 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) वृत्रासुरचतुःश्लोकीं वर्णयत।

(2) पुंसवनव्रतविधिं वर्णयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भं प्रसङ्गं व्याख्या कार्या।** **10**

(1) पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति।
जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति।

(2) कौमार आचारेत्प्राज्ञो धर्मान् भागवतानिह।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम्।

(3) अत्मा नित्योऽव्ययः शुद्धः एकः क्षेत्रज्ञः आश्रयः।
अविक्रियः स्वदृग् हेतुर्व्यापको ऽसङ्ग्यनावृतः ॥

**प्रश्नः-6 एकस्य सविस्तरं लिख्यताम्।** **10**

(1) नवधाभक्तेः वर्णनं कुरुत।

(2) प्रह्लादेन कृता नृसिंहस्य स्तुतिः।

**प्रश्नः-7 दशानां लघूत्तराणि लिखत।** **10**

(1) षष्ठे स्कन्धे कति अध्यायाः सन्ति?

(2) सप्तमे स्कन्धे कति अध्यायाः सन्ति?

(3) षष्ठे स्कन्धे का लीला?

(4) श्रीद्भागवतस्य रचयिता कः?

(5) उपपुराणानां कति लक्षणानि?

(6) महापुराणस्य कति लक्षणानि?

(7) पुराणलक्षणं किम्?

(8) षष्ठस्कन्धस्य प्रथमाध्याये कस्योपाख्यानम्?

(9) विष्णुद्वारपालौ कौ?

(10) द्वारपालौ कैः शप्तौ?

(11) हिरण्यकशिपोः कति पुत्राः?

(12) जीवः कति विकारात्मकः?

(13) द्वादशलक्षणैर्युक्तः कः?

(14) कस्य अस्थिभिः वज्रं निर्मितम्?

(15) नारायणक्वचं कस्मिन् स्कन्धे कस्मिन् अध्याये च आगच्छति?